# Sankashtaharanam Ganeshashtakam

# સઙ્કષ્ટહરણં ગણેશાષ્ટકમ્ અથવા વક્રતુણ્ડસ્તોત્રમ્

## Document Information

Text title : sa.nkaShTaharaNaM gaNeshAShTakam

File name : saNkaShTaharaNaMgaNeshAShTakaM.itx

Category : aShTaka, ganesha, shankarAchArya

Location : doc_ganesha

Author : Traditional, Shankaracharya

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, Yash Khasbage

Description-comments : shrIsiddhalakShmIgaNapatistotram

Latest update : July 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 23, 2024

*sanskritdocuments.org*

# સઙ્કષ્ટહરણં ગણેશાષ્ટકમ્ અથવા વક્રતુણ્ડસ્તોત્રમ્

(શ્રીસિદ્ધલક્ષ્મીગણપતિસ્તોત્રમ્)

શ્રીગણેશાય નમઃ ।

ધ્યાનમ્ -

હરતુ કુલગણેશો વિઘ્નસઙ્ઘાનશેષાન્
નયતુ કુલસપર્યા પૂર્ણતાં સાધકાનામ્ ।
પિબતુ બટુકનાથશ્શોણિતં નિન્દકાનામ્
દિશતુ સકલકામાન્ કૌલિકાનાં ગણેશઃ ॥

શ્રીસિદ્ધલક્ષ્મીગણેશાભ્યાં નમઃ ।
ૐ અસ્ય શ્રીસિદ્ધલક્ષ્મીગણપતિસ્તોત્રમાલામન્ત્રસ્ય ગણકઋષિઃ
ગાયત્રીછન્દઃ લક્ષ્મીગણપતિર્દેવતા
ૐ ગં બીજં હીં શક્તિઃ ક્લીં કીલકં મમ સર્વં
મનોરથસિદ્ધ્યર્થે શ્રીસિદ્ધલક્ષ્મીગણપતિપ્રીત્યર્થે જપે વિનિયોગઃ ॥

અથ કરન્યાસઃ ।
ૐ ગં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હીં તર્જનીભ્યાં નમઃ ।
ૐ ક્લીં મધ્યમાભ્યાં નમઃ ।
ૐ ગં અનામિકાભ્યાં નમઃ ।
ૐ હ્રીં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ ક્લીં કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ॥

અથ હૃદયાદિ ન્યાસઃ ।
ૐ ગં હ્ૃદયાય નમઃ ।
ૐ હીં શિરસે સ્વાહા ।
ૐ ક્લીં શિખાયૈ વષટ્ ।

ૐ ગં કવચાય હું ।
ૐ હીં નેત્રત્રયાય વૌષટ્ ।
ૐ અસ્ત્રાય ફટ્ ।
ઇતિ હૃદયાદિ ન્યાસઃ ॥

॥ ધ્યાનમ્ ॥

વિઘ્નેશં પરમં પરાત્પરતરં સિન્દૂરસર્વાઙ્કિતં
મુક્તાવિદ્રુમહેમભૂષણયુતં મન્દારમાલાર્ચિતમ્ ।
આનન્દં ચ મનોહરં શુભકરં પાશાઙ્કુશૈઃ શોભિતં
ધ્યાયેદ્ વિઘ્નવિનાશનં સુખકરં ગૌરીસુતં તં નમઃ ॥

Alternative viniyogaH
ૐ અસ્ય શ્રીસઙ્કષ્ટહરણસ્તોત્રમન્ત્રસ્ય શ્રીમહાગણપતિર્દેવતા,
સંકષ્ટહરણાર્થે જપે વિનિયોગઃ ।
ૐ ૐ ૐકારરૂપં ત્ર્યહમિતિ ચ પરં યત્સ્વરૂપં તુરીયં var ૐકારરૂપં હિમકરરુચિરં
ત્રૈગુણ્યાતીતનીલં કલયતિ મનસસ્તેજ-સિન્દૂર-મૂર્તિમ્ ।
યોગીન્દ્રૈર્બ્રહ્મરન્ધ્રૈઃ સકલ-ગુણમયં શ્રીહરેન્દ્રેણ સઙ્ગં
ગં ગં ગં ગં ગણેશં ગજમુખમભિતો વ્યાપકં ચિન્તયન્તિ ॥ ૧॥

વં વં વં વિઘ્નરાજં ભજતિ નિજભુજે દક્ષિણે ન્યસ્તશુણ્ડં
ક્રં ક્રં ક્રં ક્રોધમુદ્રા-દલિત-રિપુબલં કલ્પવૃક્ષસ્ય મૂલે ।
દં દં દં દન્તમેકં દધતિ મુનિમુખં કામધેન્વા નિષેવ્યં
ધં ધં ધં ધારયન્તં ધનદમતિધિયં સિદ્ધિ-બુદ્ધિ-દ્વિતીયમ્ ॥ ૨॥

તું તું તું તુઙ્ગરૂપં ગગનપથિ ગતં વ્યાપ્નુવન્તં દિગન્તાન્
ક્લીં ક્લીં ક્લીંકારનાથં ગલિતમદમિલલ્લોલ-મત્તાલિમાલમ્ ।
હ્રીં હ્રીં હ્રીંકારપિઙ્ગં સકલમુનિવર-ધ્યેયમુણ્ડં ચ શુણ્ડં
શ્રીં શ્રીં શ્રીં શ્રીં શ્રયન્તં નિખિલ-નિધિકુલં નૌમિ હેરમ્બબિમ્બમ્ ॥ ૩॥

લૌં લૌં લૌંકારમાદ્યં પ્રણવમિવ પદં મન્ત્રમુક્તાવલીનાં
શુદ્ધં વિઘ્નેશબીજં શશિકરસદૃશં યોગિનાં ધ્યાનગમ્યમ્ ।
ડં ડં ડં ડામરૂપં દલિતભવભયં સૂર્યકોટિપ્રકાશં
યં યં યં યજ્ઞનાથં જપતિ મુનિવરો બાહ્યમભ્યન્તરં ચ ॥ ૪॥

હું હું હું હેમવર્ણં શ્રુતિ-ગણિત-ગુણં શૂર્પકર્ણં કૃપાલું
ધ્યેયં સૂર્યસ્ય બિમ્બં હ્યુરસિ ચ વિલસત્ સર્પયજ્ઞોપવીતમ્ ।

સ્વાહા હું ફટ્ નમોઽન્તૈષ્ઠ-ઠઠઠ-સહિતૈઃ પલ્લવૈઃ સેવ્યમાનં
મન્ત્રાણાં સપ્તકોટિ-પ્રગુણિત-મહિમાધારમીશં પ્રપદ્યે ॥ ૫॥

પૂર્વં પીઠં ત્રિકોણં તદુપરિ-રુચિરં ષટ્કપત્રં પવિત્રં
યસ્યોર્ધ્વં શુદ્ધરેખા વસુદલ કમલં વા સ્વતેજશ્ચતુસ્રમ્ ।
મધ્યે હુઙ્કાર બીજં તદનુ ભગવતઃ સ્વાઙ્ગષટ્કં ષડંશે
અષ્ટૌ શક્તીશ્ચ સિદ્ધીર્બહુલગણપતિર્વિષ્ટરશ્ચાઽષ્ટકં ચ ॥ ૬॥

ધર્માદ્યષ્ટૌ પ્રસિદ્ધા દશદિશિ વિદિતા વા ધ્વજાલ્યઃ કપાલં
તસ્ય ક્ષેત્રાદિનાથં મુનિકુલમખિલં મન્ત્રમુદ્રામહેશમ્ ।
એવં યો ભક્તિયુક્તો જપતિ ગણપતિં પુષ્પ-ધૂપા-ઽક્ષતાદ્યૈ-
ર્નૈવેદ્યૈર્મોદકાનાં સ્તુતિયુત-વિલસદ્-ગીતવાદિત્ર-નાદૈઃ ॥ ૭॥

રાજાનસ્તસ્ય ભૃત્યા ઇવ યુવતિકુલં દાસવત્ સર્વદાસ્તે
લક્ષ્મીઃ સર્વાઙ્ગયુક્તા શ્રયતિ ચ સદનં કિઙ્કરાઃ સર્વલોકાઃ ।
પુત્રાઃ પુત્ર્યઃ પવિત્રા રણભુવિ વિજયી દ્યૂતવાદેઽપિ વીરો
યસ્યેષો વિઘ્નરાજો નિવસતિ હૃદયે ભક્તિભાગ્યસ્ય રુદ્રઃ ॥ ૮॥

ગણેશસ્તોત્રમિદં પુણ્યં પ્રાતરુત્થાય યઃ પઠેત્ ।
તસ્ય સર્વાણિ કાર્યાણિ સિદ્ધિં યાન્તિ હ્યસંશયમ્ ॥ ૯॥

॥ ઇતિ સઙ્કષ્ટહરણં ગણેશાષ્ટકં અથવા વક્રતુણ્ડસ્તોત્રં સમ્પૂર્ણમ્ ॥

shrIsiddhalakShmIgaNapatistotram
Some attribute authorship to Shankaracharya

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*Sankashtaharanam Ganeshashtakam*
pdf was typeset on July 23, 2024

Please send corrections to *sanskrit@cheerful.com*